# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3) (Old)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.5.3.9** | समयः- 3 तः 6 पर्यन्तम् |

दिनाङ्कः –12/10/2019 सन्दर्भग्रन्थः – वाक्यपदीयं निरुक्तञ्च

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** **गुणाः**

**प्रश्न १ निम्नयोरेकां यथाग्रन्थं निरूपयतु।** **५**

१ जायमान्न जन्मान्यद्विनाशेऽप्यपदार्थता।
अतो भावविकारेषु सत्तैका व्यवतिष्ठते॥

२ कालानुपाति यद्रूपं तदस्तीति प्रतीयते।
परितस्तु परिच्छिन्नभाव इत्येव कथ्यते।

**प्रश्न २ निम्नास्वेकां यथाग्रन्थं विस्तारयतु।** **१०**

१ द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधापि च।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्॥

२ जातिशब्दैकशेषे सा जातीनां जातिरिष्यते।
शब्दजातय इत्यत्र तज्जातिश्शब्दजातिषु॥

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नयोरेकं यथाग्रन्थं निरूपयतु।** **५**

१ के च नामशब्दाः सन्ति? ते च कुत्र प्रवर्तन्ते?

२ सर्वः क्रियाकलापो यथायोगं जन्मानाशाभिन्नः।

**प्रश्न ४ निम्नयोरेकं यथाग्रन्थं विस्तारयतु।** **१०**

१ यथा गौरिति संघातः सर्वो नेन्द्रियगोचरः।
भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते॥

२ यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नयोरेकं यथाग्रन्थं निरूपयतु।** ५

१ प्रथमं कारकं कारकाणामपि साधकम्।

२ क्रियायां प्रत्ययभागस्तु कारकादौ वर्तते, इति शास्त्रे परिकल्प्यते।

**प्रश्न ६ निम्नास्वेकां यथाग्रन्थं विस्तारयतु।** १०

१ सत्ता स्वशक्तियोगेन सर्वरूपा व्यवस्थिता।
साध्या च साधनं चैव फलं भोक्ता फलस्य च॥

२ एतावत् साधनं साध्यमेतावदिति कल्पना।
शास्त्र एव न वाक्येऽस्ति विभागः परमार्थतः।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ निम्नयोरेकं यथाग्रन्थं निरूपयतु।** ५

१ का नाम क्रिया?

२ किं नाम कारकम्?

**प्रश्न ८ निम्नास्वेकं यथाग्रन्थं विस्तारयतु।** १०

१ षड्भावविकारा भवन्तीति वार्ष्यायणिः – जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति।

२ साक्षात्कृतधर्माणः ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षाकृतधर्मस्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तेऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वा।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ का नाम क्रिया?

२ किं नाम कारकम्?

३ क्रिया व्यापारभेदेषु सत्ता कीदृशी वर्तते?

४ अस्ति किं भावयति?

५ क्रियाप्यभेदेनाभिधीयमाना का भवति?

६ सर्वेषां मूर्तानां किम् अधिकरणम्?

७ क्रियाणां प्रयोजिका का वर्तते?

८ किं नाम वाक्यम्?

९ ‘क्रिया’ इति पदे कः प्रत्ययो वर्तते?

१० का नाम क्रिया?

११ बुद्धौ किं निरूप्यते?

१२ निरुक्तं केनाचार्येण प्रणीतमस्ति?

१३ निघण्टवः केभ्यः समाहृत्य समाहृत्य समाम्नाताः?

१४ निपातस्य किं लक्षणमस्ति?

१५ निरुक्तस्य किं प्रयोजनमस्ति?